**नद्यः**

1-अस्माकं भारतदेशः अतीव विशालः अस्ति।

2-अस्मिन् बहवः गिरयः सन्ति। तेषु केचन अत्युन्नताः केचन नात्युन्नताः।

3-सर्वे ते गिरयः मेघकलापं धृत्वा वृष्टिं सम्पादयन्ति।

4-तेन अनेकाः नद्यः प्रवहन्ति। काश्चन पूर्वसमुद्रं प्रवहन्ति, इतराः पश्चिमसमुद्रम्।

5-पुराणकालाद् आरभ्य सर्वे भारतीयाः नदीनां सत्कारं कुर्वन्ति।

6-क्षेत्रेषु सलिलसेचनेन नद्यपि मातेव भवति।

7-अतएव यानि क्षेत्राणि नदीजलेन प्लावितानि तानि नदीमातृकाणीति प्रसिद्धिः, यानि च वृष्टिजलेन सिक्तानि तानि देवमातृकाणि इति।

8-वर्षाकाले अधिकेन वृष्टिपातेन नद्याः जलेन च ग्रामाः प्लाविताः भवन्ति।

9-निर्धनानां मृत्तिकानिर्मितानि गृहाणि ध्वस्तानि भवन्ति।

10- तेषां सम्पत्तिः च नश्यति।

11- सर्वे एव प्लावनपीडितानाम् अन्न-वस्त्र-वासादिदानेन साहाय्यं कुर्वन्ति।

Sanskrit cümlelerin gramatik analizini yaparak Türkçeye çevirmek.